अव्ययार्थनिबन्धनम्

—स्वामी ब्रह्ममुनिः परिव्राजको विद्यामार्त्तण्डः

अव्ययार्थनिबन्धनम्

संग्रहीता सम्पादकश्च
स्वामी ब्रह्ममुनिः परिव्राजको विद्यामार्तण्डः
गुरुकुल कांगड़ी (हरिद्वार)

प्रकाशकः—
प्रतापसिंह ट्रस्ट,
… मॉडल टाउन, करनाल

पुस्तक प्राप्तिस्थानम्—
हरयाणा साहित्य संस्थान, गुरुकुल झज्झर,
जि० रोहतक (पंजाब)

प्रथमसंस्करणम्	फाल्गुन मासः२०२३ वि०	मूल्यम्
१०००	मार्च १९६७ ई०	एकरूप्यम्

सार्वदेशिक प्रेस, दरियागंज, दिल्ली-६

प्राग्वक्तव्यम्

विपश्चिद्वर्याः ! एतस्मिन् 'अव्ययार्थनिबन्धनम्' इत्याख्ये लघुपुस्तकेऽव्ययार्थप्रदर्शका हस्तलिखितग्रन्थाः पाणिनीयाष्टाध्यायीव्याकरणं यास्कीयं निरुक्तं स्वामिदयानन्दकृतोऽव्ययार्थश्चेत्येतानि प्राक्पुस्तकान्याश्रयीकृतानि तत्र हस्तलिखितग्रन्थांस्तु बटोदरास्थस्य राजकीयसंस्कृतपुस्तकसंग्रहालयस्य तथा लवपुरस्थस्य डी० ए० वी० कालिजविभागान्तर्गतस्य लालचन्दपुस्तकालयस्य समुपलभ्याथ चावलोक्य लिखितमिदं पुस्तकम्। यत्र क्व च कोष्ठान्तर्गतः(ब०) इति आगच्छेत् स बटोदरास्थपुस्तकसंग्रहालयगतपुस्तकानां पाठोऽथ च यत्र क्वचित् कोष्ठान्तर्गतः (ल०) इति संकेतः स्यात् स पाठो लवपुरस्थपुस्तकालयगतपुस्तकानां विज्ञेयः। तदिदं लघुपुस्तकमन्वेषकानामध्यापकाध्येतॄणां च कृत उपयुक्तं स्यात्॥

—स्वामि ब्रह्ममुनिः परिव्राजको विद्यामार्तण्डः

अव्ययार्थनिबन्धनम्

वर्णानुक्रमसूचिः

अव्ययम्	पृष्ठम्	पंक्तिः	अव्ययम्	पृष्ठम्	पंक्तिः
अधि	९	६	अन्तरे	१५	१०
	९	८	अन्तरेण	२	७
	९	१७		१५	१०
	१६	११	अन्यत्	७	१२
अधुना	१७	४		१७	५
अधोधः	७	१४	अन्यतरेद्युः	१६	३
अध्यधः	९	८	अन्येद्युः	१६	२
अनिशम्	३	१०	अप	९	३
अनु	९	३		९	१५
	९	४		१८	१
	९	१५	अपरेद्युः	१५	२२
	११	२१	अपष्ठु	१८	३
	१४	७	अपि	८	४
अनुक्	३	१८		९	७
अनुकम्	३	१८		९	१६
	६	६		१६	५
	१७	८	अभि	८	२
अनुवक्	३	१८		९	५
अन्तर्	१	४		९	१२
	८	६		११	२१
	८	१९	अभितः	१४	१५
			अभीक्ष्णम्	२	१९
	१७	२		१५	४
अन्तरा	२	६	अभ्रस्	३	१८
	१५	१०	अम	२	२१

अव्ययम्	पृष्ठम्	पंक्तिः
आः	१८	१९
आङ्	७	४
	८	५
	९	४
	११	१४
	१८	८
आत्	१२	१७
आतः	६	३
आदह	५	१३
	८	१३
आनुषक्	३	१७
	१९	११
आम्	२	२२
	७	५
	१९	५
आरात्	१	१०
	१९	४
आर्य	२	१८
आर्यहलम्	२	१७
आविः (स्)	३	१०
	८	७
	१९	१०
आशु	३	८
	१२	६
	१८	७

अव्ययम्	पृष्ठम्	पंक्तिः
आस्	५	१९
	१८	१४
आह	५	१९
	७	५
आहा	७	८
आहो	७	७
	१९	३
आहोस्वित्	६	४
	९	६
	३	
इ	५	२१
	१९	२०
इत्	११	९
इतरेद्युः	२०	३
इति	३	२१
	७	१४
	७	१५
	१९	१२
इत्था	१२	५
इदं हि	१०	१४
इदा	१२	११
इदानीम्	१२	१२
	२०	५
इद्धा	१	१६
	२०	६

ओ३म्

अव्ययार्थनिबन्धनम्

अथ अव्ययार्था लिख्यन्ते ।

स्वर् स्वर्गे परलोके च । अन्तर् मध्ये । प्रातर् प्रत्यूषे । पुनर् अप्रथमे विशेषे च । सनुतर् अन्तर्धाने । (इति) स्वरादयः पञ्च रेफान्ताः ।

उच्चैस् महति । नीचैस् अल्पे । शनैस् क्रियामान्द्ये । ऋधक् सत्ये वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये (ब०) केवले (ख-ल०) । ऋते वर्जने (ब०) वर्जिते (ल०) । युगपत् एककाले । आरात्-दूरसमीपयोः (ब०) दूरसमीपे (ल०) पृथक् भिन्ने । ह्यस् अतीतेऽह्नि । श्वस् अनागतेऽह्नि । दिवा दिवसे । रात्रौ निशा । सायं निशामुखे । चिरं बहुकाले । मनाक् ईषत् अल्पे । जोषं सुखे मौने च । तूष्णीं मौने । बहिस् अवस् बाह्ये । समया समीपे मध्ये च । निकषा अन्तिके । स्वयम् आत्मार्थे (ब०) आत्मनीत्यर्थे (ल०) । वृथा व्यर्थे । नक्तं रात्रौ । नञ् निषेधे । हेतौ निमित्ते । इद्धा प्रकाश्ये (ब०) प्रकाशे (ल०) अद्धा स्फुटावधारणयोः तत्त्वा-

तिशययोरित्येके (ब०)स्फुटावधारणार्थे (ल०)। सामि अर्द्धजीप्सितयो:, अर्द्धजुगुप्सितयो: (क्वचित् पुस्तकेषु)। वत्यन्तं प्रकृतितुल्यार्थे ब्राह्मणवत् क्षत्रियवत् (ब०) वत् तेन तुल्यमित्यादिभिर्विहीतो वतिप्रत्यय: — यस्तूपसर्गात् स धात्वर्थमिति···यद् उद्वतो निवतो यासि (ल०) सना सनत् सनात् नित्ये। वट् खेदे (ख-स०) उपधा भेदे। तिरस् अन्तर्धौ तिर्यगर्थे परिभवे च। अन्तरा मध्ये विनार्थे च। अन्तरेण वर्जने। ज्योक् कालभूयस्त्वे प्रश्ने शीघ्रार्थे सम्प्रत्यर्थे च। कम् वारिमूर्द्धनिन्दासुखेषु। शम् सुखे। सहसा आकस्मिकाविमर्शयो: (ब०) आकस्मिाविमर्शे (ल०) विना वर्जने। नाना अनेकविनार्थयो:। स्वस्ति मङ्गले (ब०) माङ्गल्ये (ल०)। स्वधा पितृदाने। अलं भूषणपर्याप्तिशक्तिवारणनिषेधेषु। वषट् श्रौषट् वौषट् हविर्दाने। अन्यत्–अन्यार्थे। अस्ति सत्तायाम्। उपांशु अप्रकाशोच्चारणरहस्तयो:। क्षमा क्षान्तौ। विहायसा वियदर्थे। दोषा रात्रौ। मृषा मिथ्याविततथे। मुधा व्यर्थे। पुरा अविरते चिरातीते भविष्यदासन्ने च (ब०) अविरते (ल०)। मिथो मिथस् रह:सहार्थयो:। प्रायस् बाहुल्ये। मुहुस् पुनरर्थे। प्रबाहुकं समानकाले ऊर्ध्वार्थे च प्रवाहिकेति पाठान्तरम्। आर्यहलम् बलात्कारे। शाकटायनस्तु (ल०) आर्यप्रतिबन्धे। हलं प्रतिषेधविषादयो:। अभीक्ष्णम् पौन:पुन्ये। साकं सार्द्धं सहार्थे। नमस् नतौ। हिरुक् वर्जने वर्तने क्वचित् पुस्तके। धिक् निन्दाभर्त्सनयो:। अथ मङ्गलानन्तारम्भप्रश्नकार्त्स्न्येषु (ब०अधिकम्)। अम शैघ्र्ये अल्पे च। आम् अङ्गीकारे। कामे तिङव्यये–इति काम् प्रत्ययादिभिश्च

विहितः, आम प्रत्ययोपीह गृह्यते इत्येके पपाचैरां कारयामास (ल० अधिकम् ?)। प्रताम् ग्लानौ। प्रशान् सम्मानार्थे मानार्थे क्वचित् पुस्तके (ब०) समतार्थे (ल०)। प्रतान् विस्तारे। मा माङ् निषेधाशङ्कयोः। आकृतिगणोऽयम् ॥

कामम् स्वाच्छन्द्ये (ब०) तथाहि कामस्त्वाच्छन्द्ये (ल०) प्रकामम् अतिशये। भूयः पुनरर्थे। साम्प्रतं न्याये। परं किन्त्वर्थे। साक्षात् प्रत्यक्षे। साचि तिर्यगर्थे। सत्यम्–अर्द्धाङ्गीकारे (ब०) ब्रह्मणि च (ल० अधिकम्)। मक्षु आशु शैघ्र्ये। संवत् वर्षे। अवश्यं निश्चये। सपदि शैघ्र्ये। बलवत् अतिशये बलत् अतिशये क्वचित् पुस्तके। प्रादुस् आविस् प्रकाशे। अनिशं नित्यं नित्यदा सदा अजस्रं सततं सातत्ये। उषा रात्रौ। रोदसी द्यावापृथिव्यर्थे। ओम् अङ्गीकारे ब्रह्मणि च। भूः पृथिव्याम्। भुवः अन्तरिक्षे। झटिति झगिति तरसा शैघ्र्ये। सुष्ठु प्रशंसायाम् दुष्ठु निकृष्टे। सु पूजायाम्। अद आश्चर्ये। कु कुत्सितेषदर्थयोः। अञ्जसा तत्त्वशीघ्रार्थयोः। मिथु मिथस् द्वित्वार्थे। माजक् शैघ्र्ये। चिराय चिररात्राय 'चिरस्य (ब० अधिकम्)' चिरं चिरेण चिरात्—इत्येते चिरार्थकाः। अस्तं विनाशे। आनुषक् आनुपूर्व्ये। अनुक् (ब०) अनुवक् (ल०) अनुमाने। अभ्रस् शीघ्रसाम्प्रतिकयोः। स्थाने युक्ते। वरम् ईषदुत्कर्षे। सुदि शुदि शुक्लपक्षे। बदि कृष्णपक्षे। अच्छ सम्यगर्थे (ब० अधिकम्)। इति हेतुप्रकारयोः। च समुच्चयादिषु (ल०) समुच्चयान्वाचये-तरेतरयोगसमाहारेषु। वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये

(ब०) स्याद्विकल्पोपरमे समुच्चयेषु च (ल०)। ह प्रसिद्धौ (ब०) स्फुटार्थपादपूर्णयोः प्रसिद्धौ च (ख-ल०)। अह पूजायाम् (ब०) खेदे (ख-ल०)। एव अवधारणे। अनवक्लृप्तौ च। एवम् उक्त-परामर्शे। नूनं निश्चये तर्के च (ब०) निश्चये वितर्के च (ख-ल०) पृथक् नानार्थे (ख-ल० अधिकम्)। शश्वत् पौनःपुन्ये सहार्थे च (ब०) नित्ये (ल० अधिकम्)। युगपत् एककाले। भूयस् पुनरर्थे आधिक्ये च। कूपत् प्रश्ने प्रशंसायां च (ब० अधिकम्)। कुवित् भूयर्थे प्रशंसायां च (ब० अधिकम्) नेत् शङ्काप्रतिषेध-विचारसमुच्चयेषु। चेत् यद्यर्थे। चण् अयं चेदर्थे णित् समु-च्चयमादौ त्वनुबन्धः (इति क्वचित)। कच्चित् इष्टप्रश्ने। यत्र यच्च अनवक्लृप्त्यमर्षगर्हाश्चर्येषु। नह प्रत्यारम्भे। हन्त हर्षे विषादे अनुकम्पायां वाक्यारम्भे च। माकिः माकी (मक कचित्) नकिः वर्जने। माङ् नञौ स्वरादिपूक्तौ, इह पाठस्तु निपातत्वार्थः 'तेनाद्युदात्तत्वं सिद्ध्यतीति प्रायः तच्चिन्त्यं फिट् स्वरेणापीष्ट-सिद्धेः, यद्यप्याहुः सत्त्ववचनानामप्यव्ययसंज्ञार्थं स्वरादिपाठः इति तदपि चिन्त्यं लक्ष्मीवाचकस्यापि मा शब्दस्याव्ययत्वापत्तेः तस्मादुभयत्र पाठे फलं चिन्त्यम्' (ल० अधिकम्) यावत् तावत् साकल्यावधिमानावधारणेषु 'साकल्ये यावत्कार्यं तावत्कृतम्, अवधौ यावद् गन्तव्यं तावत् तिष्ठ, माने यावद् दत्तं तावद् भुक्तम्, अवधारणे यावदमत्रं तावद् ब्राह्मणानामन्त्रयस्व' (अधिकम् ल०) त्वे विशेषवितर्कयोः। द्वै वितर्के न्वै इति पाठान्तरम्। रै दानेऽनादरे च 'रै करोति ददातीत्यर्थः त्वं रै

करिष्यति' (इति चाधिकं क्वचित्) श्रौषट् वौषट् हविर्दाने। स्वाहा देवताभ्यो दाने। स्वधा पितृभ्यः। (ल०) स्वधा पितृदाने (ब०) श्रौषडादीनामनेकाचामुभयत्र पातः स्वरभेदार्थः' नुम् नुं कारे गुरु नु कृत्य बहु नु कृत्य। तथाहि निदर्शने। खलु निषेधवाक्यालङ्कारनिश्चयेषु। किल वार्तायामलीके च। अथ मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु 'अयं स्वरादिरपि तेन मङ्गलवाचकस्यातस्वार्थेऽप्यव्ययत्वं सिद्ध्यति तथा च श्रीहर्षः उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कवाक् त्विषि वेदिकोदरे यथो कुलाचारमथावनीन्द्रजे पुरेऽधिवर्गः स्नपयाम्बभूव तमिति— हि अथ स्नपयाम्बभूवेत्यस्य मङ्गलस्नपनं चकारेत्यर्थः—निपातस्तु स्वरूपेणैव मङ्गलं मृदङ्गध्वनिवत् सुष्ठु। स्वरभेदार्थः (ल० अधिकम्)। सुष्ठु 'दुष्ठु—अपि क्वचित्' स्वरभेदार्थः। स्म अतीते पादपूरणे च। आदह (ब०) अङ्गह (ल०) उपक्रमहिंसाकुत्सनेषु। उपसर्गस्वरविभक्तिप्रतिरूपकाश्च। अवदत्तम्, अंहयुः, अस्ति, क्षीरा, अवदत्तमिति इहानुपसर्गत्वात्—अच उपसर्गात्त त् इति न भवति' (इति क्वचित्)। अहं सुबन्तप्रतिरूपकमव्ययमहङ्कारे 'त्वमस्मि वाच्ये' (क्वचित्) शुभं शुभार्थे (ब० अधिकम्)। वां युवामित्यर्थे। अस्ति तिङ्प्रतिरूपकमव्ययम्। अस्मि—इत्यहमर्थे। आह उवाचेत्यर्थे। आस बभूवेत्यर्थे। अ इति सम्बोधने (ब०) बोधने (ल०) प्रतिक्षेपे (ब०) अधिदोषे (ल०) निषेधे च। आ इति वाक्यस्मरणयोः। इ सम्बोधनजुगुप्साविस्मयेषु। ई उ ऊ ए ऐ ओ औ सम्बोधने। पशु सामर्थ्ये। शुकं शैघ्र्ये। यथाकथा च

अनादरे । पाट् प्याट् 'प्याङ्' (क्वचित्) अङ्ग है हे भोः अये सम्बोधने । घ ? घ हिंसाप्रातिलोम्यपदार्थपूरणेषु । विषु नानार्थे । एकपदे अकस्मादित्यर्थे । युत् कुत्सायाम् । आत इतोपीत्यर्थे । आकृतिगणोऽयम् 'तद्यथा' (क्वचित्) । यत् तत् हेतौ । आहोस्वित् विकल्पे । सीम् सर्वतोभावे । कम् पादपूरणे । सुकम् अतिशये । अनुकं वितर्के । शम् वट् अन्तःकरणे आभिमुख्ये च । वम (ब०) वा (ल०)पादपूरणे इवार्थे च । दिष्ट्या आनन्दे । चटु चाटु प्रियवाक्ये । ऊं 'हुं' (क्वचित्) भर्त्सने । इव सादृश्ये । अद्यत्वे इदानीमित्यर्थे ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

इति श्रुतिलिङ्गकारकसंख्याऽव्ययपरा ।

वष्टि भागुरिरल्लोपमवप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

वगाहः । अवगाहः । पिधानम् । अपिधानम् ॥ इत्यव्ययानि ॥

क्वचित्—

वा विकल्पोपमाननिषेधेषु वर्तते । ह प्रसिद्धार्थे । अह निग्रहार्थे । स्वस्ति अविनाशे सुखे च । अस्ति सत्तायाम् । स्यात् अनेकान्तपर्यायः । मिथः परस्परार्थे । अथ अथो आनन्तर्यविकारमङ्गलार्थान्तरविवक्षासु वर्तते । ह्यः पूर्वदिने । श्वः परदिने । उच्चैः

नीचैः उच्चनीचयोः । सह साकं सार्द्धं समं सत्रं अमा एते सम्बन्धे । नमः नमस्कारपूजनयोः । अलं समर्थादौ आदिशब्दाद् भूषणपर्याप्तिशक्तिवारणेषु । किल निश्चयस्मरणयोः । भृशं अत्यर्थे । यत् तत् कारणे सम्बन्धे च । आङ् मर्यादाभिविधिव्याप्तिषु । आह पीडाकोपयोः । आम् प्रतिवचनावधारणयोः । अनु गुण्ये च । शश्वत सर्वकाले । यत् यद्यर्थे । कश्चित काम-प्रवेदने । उ, हि, च, स्म, इ, वै इत्येते पादपूरणार्थे । आहो उताहो विकल्पार्थे । आहा शोकादौ । ननु पूजापरमताक्षेपादौ । तु भेदा-वधारणयोः । नु तु पु वितर्के । किन्तु विशेषावधारणे । किमुत किम्पुनरर्थे । यदुत वाक्यार्थनिर्देशे । प्रत्युत वैपरीत्ये । यथाकथा वा अनादरे । तथा समुच्चयाभ्युपगमननिर्देशनसादृश्येषु । अहह विस्मयविषादयोः । नवै नवा विकल्पनिषेधयोः । यदि कदा-चिदर्थे पक्षान्तरे । यथाकथाचित् अनादरे । पुत् कुत्सायाम् । नाम सम्भाजने ? । अधः अधोधः अधरे । इति इह लोक-प्रवादागमयोः । इति शब्दो हेतुप्रकरणप्रकारसमाप्तिषु । नह प्रत्यारम्भे । हन्त सम्बोधनहर्षमनुष्यसम्प्रदानेषु । फट्ट फट विघ्नप्रोच्छार्थे ? । हि स्फुटार्थे हेतौ च । भो भगो अघो है हो अहो ने हीनसम्बोधने । द्य विषादे । ही विस्मये । ननु मानो-द्भावनादौ । शुकं शैघ्र्ये । अह्नाय शीघ्रार्थे ।

अपि च—

अहो आश्चर्ये खेदे च । ह्यस् अतीतेऽह्नि । प्र प्रकर्षार्थे ।

परा निराकरणे। सम् सम्यगर्थे। अव स्थितिज्ञानार्थे। निर् निर्गतार्थे। दुस् दुर् दुःखे। अभि अभिमुखे। वि विशेषार्थे प्रक्षेपणे निषेधे च। सु पूजायाम्। उत् ऊर्ध्वे। नि निधाने निषेधे च। प्रति वीप्सायाम्। परि वर्जने। अति अतिशये। अपि सम्भावनायां निश्चये च। उप समीपे। आङ् मर्यादाभिविध्योः समानार्थेऽपि। माङ् निषेधाशङ्कयोः। श्रत् श्रद्धायाम्। अन्तर् मध्ये। आविर् प्राकट्ये। (ख० ल० अधिकम्)।

तिरस् तिर्यगर्थे परिभवे च। सहसा आकस्मिकविमर्शयोः। अलं भूषणपर्याप्तिशक्तिनिवारणनिषेधेषु। क्षमा शक्तौ। विहायसा आकाशे। पुरा अतीतकाले। प्रायस् बाहुल्ये। मुहुः पुनरर्थे। साकं सार्द्धं समं सहार्थे। धिक् निन्दाभर्त्सनयोः। तथाहि निदर्शने। खलु निषेधे वाक्यालङ्कारे! किल श्रयवार्तायामलीके च। सुष्ठु प्रशंसायाम्। दुष्ठु कष्टे। आदह उपक्रमहिंसनकुत्सनेषु। आ भर्त्सनाश्चर्ययोः वाक्यस्मरणयोश्च। ई भर्त्सने। ऊ दुःखवितर्कयोः। ऋ ॠ लृ गानस्वरे। अ सम्बोधने अधिक्षेपे च। (ख० ल० अधिकम्)

अष्टाध्याय्यां समागता अव्ययार्थाः—

च्वि अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि। सत् आदरे। असत् अनादरे। अलं भूषणे। अन्तर् अपरिग्रहे। कणे मनसि श्रद्धाप्रतिघाते। अदः अनुपदेशे। तिरः अन्तर्धौ। उरसि मनसि मध्ये पदे निवचने अनत्याधाने (कृञ् धातुप्रयोगे)।

हस्ते पाणौ उपयमने (कृञ्धातुप्रयोगे)। प्राध्वं बन्धने (कृञ् धातुप्रयोगे)। जीविका, उपनिषत्-औपम्ये (कृञ् धातुप्रयोगे)। अनु लक्षणे तृतीयार्थे हीने च। उप, अधिके हीने च। अप परि वर्जने। आङ् मर्यादवचने। प्रति, परि, अनु लक्षणेत्थम्भूताख्यान-भागवीप्सासु। अभि भागरहिते लक्षणादौ। प्रति प्रतिनिधि-प्रतिदानयोः। अधि परि, अनर्थे च। सु पूजायाम्। अति पूजा-यामतिक्रमणे च। अपि पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु। अधि, ईश्वरे। प्र सम् उप उद् पादपूरणे। उपर्युपरि अध्यधः सामीप्ये।

निरुक्ते पठिता अव्ययार्थाः—

आ इत्यर्वागर्थे। प्र परा—इत्येतस्य (आकारस्य) प्राति-लोम्यम्। अभि —इत्याभिमुख्यम्। प्रति—इत्येतस्य प्राति-लोम्यम्। अति सु इत्यभिपूजितार्थे। निर् दुर् प्रातिलोम्यम्। नि अव इति विनिग्रहार्थीयौ। उद् इत्येतयोः प्रातिलोम्यम्। सम् इत्येकीभावम्। वि अप इत्येतस्य प्रातिलोम्यम्। अनु इति सादृश्यापरभावम्। अपि—इति संसर्गम्। उप इत्युपजनम्। परि-इति सर्वतोभावम्। अधि इत्युपरिभावैश्वर्यं वाह। इव उपमार्थे भाषायाञ्च-अन्वध्यायं च-अग्निरिव इन्द्र इवेति। न—इति प्रतिषेधार्थीयो भाषायाम्, उभयमन्वध्यायम्—नेन्द्रं देवममंस्त इति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति-दुर्मदासो न सुरायाम्। इत्युपमार्थीयः, उपरिष्टादुपचारस्तस्य येनोपमिमीते।

चित्- इत्येषोऽनेककर्मा-आचार्यश्चिदिदं ब्रूयादिति पूजायाम्। आचार्यः कस्मादाचार्य आचारं ग्राहयतीत्यर्थानाचिनोति बुद्धिमिति वा। दधिचित् इत्युपमार्थे कुल्माषांश्चिदाहरेत्यवकुत्सिते। नु इत्यषोऽनेककर्मा—इदं नु करिष्यतीति हेत्वपदेशे। कथं नु करिष्यतीत्यनुपृष्टे। नन्वकार्षीदिति च, अथाप्युपमार्थे भवति वृक्षस्य नु ते पुरुहूत वयाः। वृक्षस्येव ते पुरुहूत शाखाः। च—इति समुच्चयार्थ उभाभ्यां सम्प्रयुज्यते--अहं च त्वं च वृत्रहन्। एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य आ-इत्याकारः। वा-इति विचारणार्थे-हन्ताहं पृथिवीमिमां निदधानीह वेह वेति। अथापि समुच्चयार्थे भवति—वायु र्वा त्वा मनुर्वा त्वेति। अह इति च ह इति विनिग्रहार्थीयौ पूर्वेण सम्प्रयुज्येते अयमहेदं करोत्वयमिदं ह करिष्यतीदं न करिष्यतीति अथाप्युकार एतस्मिन्नेवार्थे-उत्तरेण मृषेमे वदन्ति सत्यमु ते वदन्तीति। अथापि पदपूरण इदमु तदु। हि-इत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे, कथं हि करिष्यतीति-अनुपृष्टे, कथं हि व्याकरिष्यतीति—असूयायाम्। किल इति विद्याप्रकर्षे--एवं किल-इति। अथापि न ननु इत्येताभ्यां सम्प्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवम्। मा इति प्रतिषेधे-माकार्षीर्मा हार्षीरिति च। खलु—इति च (प्रतिषेधे) खलु कृत्वा खलु कृतम्। अथापि पदपूरणे एवं खलु तद्बभूवेति। शश्वत् इति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्टे—एवं शश्वत् इत्यस्वयं पृष्टे। नूनम्—इति विचिकित्सर्थीयो भाषायामुभयमन्वध्यायं विचिकित्सर्थीयश्च पद-

पूरणश्च, न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्। अन्यस्य चित्तमभिसञ्चरेण्यमुताधीतं विनश्यति ॥ न नूनमस्त्यद्यतनं नो एव श्वस्तनम्। अद्यास्मिन् द्यवि। श्व आशंसनीयः—कालः ह्यो हीनःकालः। अथापि पदपूरणः,नूनं सा ते प्रति वरं जरित्रे…। सा ते प्रति दुग्धा वरं जरित्रे। सीम् परिग्रहार्थीयो वा पदपूरणो वा—प्रसीमादित्यो असृजत्-प्रासृजदिति वा, प्रासृजत् सर्वत इति वा। त्वत् समुच्चयार्थे भवति—पर्याया इव त्वदाश्विनम्—आश्विनं च पर्यायाश्चेति। कम् ईम् इद् उ अमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति मिताक्षरेषु पदपूरणा अनर्थकाः—शिशिरं जीवनाय कम्-शिशिरं जीवनाय, एमेनं सृजता सुते—आसृतैनं सुते, तमिद् वर्धन्तु नो गिरः—तं वर्धयन्तु नो गिरः, अयंमु ते समतसि-अयं ते समतसि। इव इत्यपि वाक्यपूरणः पदपूरणश्च—सुदुरिव सुविज्ञायेते इव। न इत्येष इद् इत्येतेन सम्प्रयुज्यते परिभये, हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्। शचीर्मदन्त उत दक्षिणाभिर्नेज्जिजह्मायन्त्यो नरकं पताम। न च इत्येष इद् इत्येतेन सम्प्रयुज्यतेऽनुपृष्टे—न चेत् सुरां पिबन्ति। 'आ इत्याकार……उपमार्थे दृश्यते' जार आ भगम्' आ इत्याकारः… …अथाप्यध्यर्थे दृश्यते 'अभ्र आँ अपः' आ क्रियार्थे,आ—आहर। 'आ—आरुह्य। अभि क्रियायोगे अभि—अभिवीत। सु क्रियायोगे सुष्टौमि। निर् समित्येतस्य स्थाने॥ अनुक्रियायोगे अनु—अनूपास्ते। परि सर्वतः। चित्-इत्येषः 'अपि' इत्येतस्यार्थे 'सद्यश्चिद्यः-सद्योऽपि। नु क्षिप्रम्।

उत–अपि इत्यस्यार्थे 'उत त्वं सख्ये— अप्येकं वि–मतुबर्थे विश्वकद्रार्षः' । हिरुक्–अन्तर्हितम् । वत्–इति सिद्धोपमा । नूचित्–नू च 'नूचिदितिनिपातः पुराणनवयोर्नूचेति च ।' सचा सहेत्यर्थः । इत्था— अमुत्था । अच्छ अच्छराभेराप्तुमिति शाकपूणिः । आशु इति च शु इति च क्षिप्रनाम्नी भवतः । ऋधक्–इति पृथग्भावस्य प्रवचनम् । घ पदपूरणे । सामि–सुसमाप्तम् ।

निघण्टु ग्रन्थे—

'नु मक्षु' इति क्षिप्रनाम । सनुतः, हिरुक्, अन्तर्हितनाम । प्रत्नम्, प्रदिवा, सनेमि, अह्नाय, पुराणनाम । नूनम्, इदा, इदानीम्, नवनामानि ।

गणपाठे—

'नाकिर्, नकिर्, आङ्, अ, मा, नो, ना, वाकिरादयः प्रतिषेधे ।'

वैदिक साहित्ये—

आत् आनन्तर्ये । कथा कथमर्थे । घ अप्यर्थे । वाव निश्चये ।

ऋषिदयानन्दकृते "अव्ययार्थनामके" वेदाङ्गप्रकाशेऽव्ययार्थाः—

अव्ययानि	अर्थाः	उदाहरणानि
अथ, अथो	मङ्गलानन्तराऽऽरम्भप्रश्नकार्त्स्न्याधिकारेषु ।	(मङ्गले) अथातो ब्रह्मजिज्ञासा (अनन्तरे) वेदमधीत्याथ धर्मो जिज्ञासितव्यः(आरम्भे) अथाध्येतव्यम् (प्रश्ने) अयं वक्तुं समर्थोऽथ न समर्थः (कार्त्स्न्ये) अथ वेदार्थं ब्रूमः (अधिकारे) अथ शब्दानुशासनम् ॥
अति	क्रान्तप्रकर्षोल्लङ्घनातिशयपूजनेषु ।	(क्रान्ते) मालामतिक्रान्तोऽतिमालः (प्रकर्षे) अत्युत्तमो विद्वान् (लंघने) अतिवेलं भुङ्क्ते (अतिशये) अतिबली देवदत्तः (पूजने) अत्यादृतः ।
अतीव	अतिशयार्थे ।	अतीव शोभते धर्मी ।

अलम्	भूषणपर्याप्तिशक्ति-वारणेषु	(भूषणे) विद्ययाऽलङ्कृता कन्या (पर्याप्तौ) अलं भोक्ता (शक्तौ) अलं वीरो वीराय (वारणे) अलं महीपाल तव श्रमेण ।
अग्रतः, अग्रे	पुरार्थे	अग्रतो याहि । अग्रे गच्छ ।
अनु	पश्चात्सादृश्यलक्षणेत्थम्भूताख्यान-भागवीप्सासु ।	(पश्चात्) गुरुमनुगच्छति शिष्यः (सादृश्ये) वेदमन्वाचरति विद्वान् (लक्षणे) वृक्षमनु विद्योतते विद्युत् (इत्थम्भूताख्याने) साधुर्विद्वाननु 'धर्मम्' (भागे) यदत्र मामनु स्यात् तद् देहि (वीप्सायाम्) पदं पदमनुचिन्तयति ॥
अभितः	समीपोभयतः शीघ्र-साकल्याभिमुख-सर्वतोभावेषु ।	(समीपे) प्रयागमभितो गङ्गा (उभयतः) अभितो भवतु सेना (शीघ्रे) अभितोऽधीष्व (साकल्ये) अभितो वनं दग्धम (अभिमुखे) अभितो दीपे शलभाः पतन्ति (सर्वतोभावे) अभितो वर्षति मेघः ॥

अहह	अद्भुतखेदयोः ।	(अद्भुते) अहह बुद्धिप्रकर्षो राज्ञः (खेदे) अहह मया कालो व्यर्थो नीतः ॥
अभीक्ष्णम्,		अभीक्ष्णं विचार्य वक्तव्यम् ।
असकृत्	बारंवारार्थौ ।	असकृदध्यापनीया विद्यार्थिनः ॥
अञ्जसा,	द्रुते ।	अश्वोऽञ्जसा धावति ।
अह्नाय		अह्नाय सूर्येण तमो निरस्तम् ॥
अन्तरेण	वर्जनमध्ययोः ।	(वर्जने) विद्यामन्तरेण कुतः शान्तिः (मध्ये) अनयोर्ग्राम-
अन्तरा,		योरन्तरा नदी । अनयोरन्तरे
अन्तरे,		तिष्ठामि ।
अवश्यम्	निश्चये ।	सर्वैर्मनुष्यैरवश्यं वेदः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ॥
अर्वाक्	अवरे	अर्वागागच्छ दुष्टात्मन् ! ॥
अस्तम्	अदर्शने	सायमस्तमितो रविः ॥
अस्ति	सत्त्वेऽर्थे	अस्तीदं जङ्गमं जडम् ॥
अङ्ग	पुनरर्थसम्बोधनयोः ।	मूर्खोऽपि नावमन्यते किमङ्ग विद्वान् । अङ्ग देवदत्त ॥
अद्य	वर्तमानेऽहनि ।	अद्यायाहि मया सह ॥
अपरेद्युः	अपरदिने	अपरेद्युर्गमिष्यामि ।

अधरेद्युः,	अन्यस्मिन्दिने	
अन्येद्युः		अधरेद्युस्त्वमागच्छेः।
अन्यतरेद्युः	अन्यस्माद-न्यस्मिन् दिने	आगतोऽन्यतरेद्युः सः।
अपि	पदार्थसम्भाव-नाऽन्ववसर्गगर्हा-समुच्चयशङ्का-प्रश्नेषु।	(पदार्थे) सर्पिषोऽपि स्यात् (सम्भावने) अपिसिञ्चेन्मू-लकसहस्रम् (अन्ववसर्गे) अपि स्तुहि (गर्हायाम्) देव-दत्तमपि कामिनम् (समुच्चये) पठापि पाठय (शङ्कायाम्) अपि चोरो भवेत् (प्रश्ने) त्वं किमपि जानासि?
अद्धा	स्वीकारे	विद्यामद्धावैहि।
अञ्जसा		अञ्जसा धर्ममाचर।
अधरात्, अधरेण, अधस्तात्	एतेऽधोदि-ग्देशकाल-वाचकाः।	अधरात्, अधरेण, अध-स्ताद् गच्छेत्यादि॥
अव	विनिग्रहक्रिया-योगयोः।	(विनिग्रहे) अवग्रहः (क्रिया-योगे) अवतिष्ठते॥
अधि	उपरिभावैश्वर्य-क्रियायोगेषु	(उपरिभावे) अधिष्ठाता (ऐश्वर्ये)अधिराजः (क्रियायोगे अधिगच्छेत्त तान् स्वयम्॥

अमा	सहसमीपयोः	(सहार्थे) मित्रेणाऽमा भुंक्ते (समीपे) अमात्यो राजानममा गच्छति ॥
अधुना	वर्तमानकाले	अधुना गच्छामि ॥
अन्तर्	मध्ये	अन्तः शोचति ॥
अवस	रक्षणादिपु	अवो याहि ॥
अधस्	अर्वागगतौ	वृक्षेभ्योऽधः पतितः ॥
अन्यत्	भिन्नेऽर्थे	अस्मादिदमन्यत्करोषि ॥
अम्	अङ्गीकारे	अमस्तु यत्वयोक्तम् ॥
अरे	कनिष्ठसम्बोधने	अरे मैत्रेयि !
अनुकम्	आनुकूल्ये	अनुकं गच्छ ॥
अध	आनन्तर्ये	भोजनं कृत्वाऽध गच्छ ॥
अहोबत	अनुकम्पाखेदयोः	(अनुकम्पायाम्) अहोबत न हन्तव्यः (खेदे) अहोबत मे मृतः पुत्रः ॥
अमुत्र	भवान्तरे	अमुत्र जायते जन्तुः ॥
अहो	विस्मये	अहो रूपं पश्य ॥
अ	अभावे	अराजके तु लोकेऽस्मिन् सर्वतो विद्रुते भयात् ॥
अस्तु	असूयाङ्गीकारयोः।	(असूयायाम्) अस्तु तवेदं कथनम् (अङ्गीकारे) अस्तु त्वद्वचः सत्यम् ॥

अप	पृथग्भावे	अपेतः ॥
अह	विनिग्रहार्थीयः	अयमहेदं करोतु ॥
अपष्ठु	निन्दाशोभार्थयोः	(निन्दायाम्) अपष्ठु भृत्योऽयम् (शोभार्थे) अपष्ठु पठत्ययम् ॥

आ

आशु	शीघ्रार्थे	आश्वश्वमापय ॥
आङ्	अर्वागीषदर्थक्रियायोगमर्यादाभिविधिषु ।	(अर्वाङ्चि) आकाशाद्वायुः (ईषदर्थे) आपिङ्गला (क्रियायोगे) आगच्छति (मर्यादायाम्) आसमुद्राद् राजदण्डः (अभिविधौ) आकुमारं यशः पाणिनेः ॥
आस्	कोपपीडयोः	(कोपे) आः पापं विकत्थसे (पीडायाम्) आः ज्वरः किं करिष्यति ॥
आ	वाक्यस्मरणयोः	(वाक्ये) आ एवं नु मन्यसे (स्मरणे) आ एवं किल तत् ॥
आः	स्मृतिवाक्यानुकम्पासु	(स्मृतौ) आः क्व गतं धनम् (वाक्ये) आः साधु पठसि (अनुकम्पायाम्) आः कथमिमं दुःखयसि ॥

आरात्	दूरसमीपयोः	(दूरे) दुष्टादाराद्वसेत् (समीपे) श्रेष्ठादाराद्वसेत् ॥
आहो	विकल्पे	अथ व्याकरणमधीत आहो निरुक्तम् ॥
आम्	अङ्गीकारे	आं करोमि त्वद्वचः ॥
आहोस्वित्	प्रश्नपक्षान्तरयोः	(प्रश्ने) त्वं काशीवास्याहोस्विन्मथुरावासी (पक्षान्तरे) त्वं वैशेषिकं पठस्याहोस्विन्न्यायम् ॥
आविस्	प्राकट्ये	आविर्भाव्या सत्कीर्तिः ॥
आनुषक्	आनुकूल्ये	धर्मेणानुषग्वर्तितव्यम् ॥

इ

इति	हेतुप्रकरणप्रकर्षादिसमाप्तिषु ।	(हेतौ) शूरो हन्तीति कातरः पलायते (प्रकरणे) इति वदति पाणिनिः (प्रकर्षे) इत्याहाऽऽप्तः (क्रमे) इति व्याकरणमधीते (अनुक्रमे) इति वेदमध्यापयति पठित्वेत्यर्थः (समाप्तौ) इति प्रथमः पादः ॥
इ	भेदरुषोक्त्यनुकम्पाऽपाकरणेषु ।	(भेदे) इ अयं पुरुषोत्तमः (रुषोक्तौ) इ दुष्टं हिन्धि (अनुकम्पायाम) इ पुत्र सुखी

		भव (अपाकरणे) इ यात्वितः खलः ॥
इतरेद्युः	इतरस्मिन् दिने	इतरेद्युः स आगतः ॥
इव	उपमायाम्	आप्त इवायं वदति ॥
इदानीम्	वर्तमानकाले	इदानीमस्मि नीरोगः ॥
इद्धा	प्रकाशे	इद्धा तपत्ययं राजा ॥

ई

ई	विषादानुकम्पयोः	(विषादे) ई अयं दुःखं वदति (अनुकम्पायाम्) ई अनाथः सुखी भवेत् ॥
ईषत्	अल्पेऽर्थे	ईषद्दत्तमनेनास्मै ॥

उ

उ	रुषोक्त्यनुकम्पानियोगसम्बन्धपादपूरणेषु	(रुषोक्तौ) उ उत्तिष्ठ दुष्टेतः (अनुकम्पायाम्) उ अभ्यौषधं कुरु (नियोगे) उ अयं द्वारि तिष्ठतु (सम्बन्धे) उ अयं मम प्रियः (पादपूरणे) किमु कार्यं ममाऽनघ ॥
उत	प्रश्नाप्यर्थविकल्पेषु ।	(प्रश्ने) वेदमधीषे उताध्यापयसि (अप्यर्थे) मा वधीःपितरं मोत मातरम् (विकल्पे) वेदं पठस्युत वेदाङ्गम् ॥

उररी	विस्ताराङ्गीकारयोः।	(विस्तारे) उररी करोति सञ्चयम् (अङ्गीकारे) उररी कृतमिदं मया ॥
उच्चैस्	महत्यर्थे	उच्चैः पर्वताः सन्ति ॥
उम्	प्रश्नेऽर्थे	उम् देवदत्तः क्व गतः।
उषा	रात्र्यवसानयोः	(रात्रौ) उषा भवेत्तमोवृता (तदवसाने) उत्तिष्ठ उषा जाता ॥
उभयेद्युः	उभयोर्दिनयोः	उभयेद्युः कृतं कार्यम् ॥
उत्तरेद्युः	आगामिदिने	उत्तरेद्युरहङ्गतः ॥
उदक्, उत्तरात्, उत्तरेण, उत्तरतः	एते उत्तरदिग्देशकालवाचकाः	उदक्, उत्तरात्, उत्तरेण, उत्तरतो वा सन्ति वसन्ति वेत्यादि ॥
उपरि, उपरिष्टात्	ऊर्ध्वदिग्देशकालवाचकौ।	उपरि, उपरिष्टात् वा गच्छन्ति पक्षिणः ॥
उप	उपजनसामीप्यक्रियायोगेषु।	(उपजने) उपक्रमः (सामीप्ये) उपकुम्भम् (क्रियायोगे) उपतिष्ठते ॥
उद्	उत्कृष्टोर्ध्वक्रियायोगेषु।	(उत्कृष्टे) उत्तमः (ऊर्ध्वे) उद्गतः (क्रियायोगे) उद्यम्यते ॥
उताहो	विकल्पार्थे	त्वं मीमांसां पठस्युताहो

		वैशेषिकम् ।।
उपांशु	शनैर्जपेऽर्थे ।	उपांशु जपति ।।
उञ्, उकञ्	उत्प्रेक्षायाम् ।	किमु विद्वान् धार्मिकः स्यात् । किमुक विद्यया सुखं भवेत् ।।

ऊ

ऊरी	विस्ताराङ्गीकारयोः ।	(विस्तारे) ऊरीकुर्याद् विद्याम् (अङ्गीकारे) ऊरी कुर्याद् धर्मम् ।।
ऊ	पक्षवाक्याऽऽरम्भानुकम्पासु ।	(पक्षे) ऊ अयं मम सेवकः (वाक्यारम्भे) ऊ एवं नु मन्यसे (अनुकम्पायाम् ऊ ते दुःखं विनश्यतु ।।
ऊम्	रुषोक्तौ	ऊं शत्रुर्हन्तव्यः ।।
ऊर्ध्वम्	ऊर्ध्वं दिग्देशकालवाचकः ।	ऊर्ध्वं गच्छति वायुः ।।

ऋ

ऋ	वाक्यगर्हणयोः ।	(वाक्ये) ऋ त्वं किं सेवसे (गर्हणे) ऋ गच्छ पापकृतम् ।'
ऋधक्	स्वीकारे	ऋधक् सत्सङ्गतिं कुरु ।।
ऋते	वर्जनेऽर्थे	ऋते ज्ञानान्न मुक्तिः ।।

ए

एवम्	प्रकारोपमाङ्गीकारावधारणेषु।	(प्रकारे) एवं कुरु (उपमायाम्) एवम्भूतो देवदत्तः (अङ्गीकारे) एवमस्तु वेदोक्तम् (अवधारणे) एवं विदुषां मतम्॥
एव	अवधारणे	सत्यमेव वेदोक्तम्॥
एकदा	कदाचिदर्थे	एकदाऽत्राऽऽगताः सर्वे॥
एतर्हि	वर्तमानकाले	एतर्ह्यधीते वेदम्॥

ऐ

ऐ	अनुनये	ऐ धर्ममुपदिश॥
ऐषमः	वर्तमाने वर्षे।	ऐषमो बालकोऽयं मे॥

ओ

ओम्	प्रणवोपक्रमानुमतिषु।	(प्रणवे) ओं प्रणवः (उपक्रमे) ओमित्येतदक्षरमुद्गीथमुपासीत(अनुमतौ) ओमिदं सत्यमुक्तमनेन॥

क

कु	पापकुत्सेषदर्थेषु।	(पापे) कुकर्मी (कुत्सायाम्) कुपुरुषः (ईषदर्थे) कवोष्णम्॥
किञ्चित्	अल्पे	किञ्चिदद्य मया भुक्तम्॥
कामम्	कामानुमतकाम-	(कामानुमते) कामं त्वदीयं

	प्रवेदनयोः ।	कार्यं करोमि (कामप्रवेदने) कामं मे पुत्रं पाठय ॥
कच्चित्	कामप्रवेदने ।	कच्चित्कुशलमस्ति ते ॥
कदाचित्	कस्मिंश्चित्काले ।	कारणमन्तरा कार्यं कदाचिन्न जायते ।
किल	विद्याप्रकर्ष-निश्चयवार्ता-सम्भाव्येषु ।	(विद्यायाम्) किलायं विद्वान् (प्रकर्षे) किलेदं वस्तु ग्राह्यम (निश्चये) एवं किलेदमस्ति (वार्तायाम्) जघान कंसं किल वासुदेवः (संभाव्ये) विद्वांसं किलाश्रयेयुर्विद्यार्थिनः ॥
कम्	वारिमूर्द्धसुखेषु ।	(वारिणि) कं पिब (मूर्ध्नि) कं भूषय (सुखे) मह्यं कं देहि ॥
किमुत, किमूत	विकल्पे ।	त्वं न्यायमधीषे किमुत वेदान्तम् । त्वमायुर्वेदमधीषे किमूत धनुर्वेदम् ॥
किम्	पृच्छाजुगुप्सनप्रश्न-विकल्पक्षेपेषु ।	(पृच्छायाम्) किं पठसि भोः (जुगुप्सने) किं पण्डितो यः पक्षपाती (प्रश्ने) किमयं पुरुषः (विकल्पे) किमैहिककर्मजन्यं सुखं दुःखं वा पूर्वजन्मकृतम् (क्षेपे) कश्चा[illegible] राजा

		किमाज्ञा ॥
कूपत्	कोपे	कथं कूपद् वदसि ॥
कुवित्	बले	कुवित्पुरुषः ॥
केवाली	हिंसायाम्	केवाली करोति दुष्टान् ॥
कण	श्रद्धाप्रतिघाते ।	कणेऽत्य पयः पिबति ॥
किञ्च	प्राक्पूर्वस्मि-न्नवान्तरे ।	(प्राक्पूर्वस्मिन्) व्याकरणं मयाऽधीतं किञ्चान्यन्नाधीतम् (अवान्तरे) अनयोः पुरुषयोः किञ्चास्ति ॥
किन्नु	प्रश्नवितर्कयोः ।	(प्रश्ने) किन्नु तेनोक्तम् (वितर्के) किन्नु नो दुःखं भवति ॥
किमु	सम्भावना-मर्शयोः ।	(सम्भावनायाम्) किमु त्वं विद्यां पठिष्यसि (आमर्शे) किमु तदेव स्यान्न वा ॥

ख

खलु	निषेधवाक्या-लङ्कारजिज्ञासा-नुनयेषु ।	(निषेधे) खल्वधर्मान्निर्गच्छेत् (वाक्यालङ्कारे) एतत्खल्वाहुः (जिज्ञासायाम्) व्याकरणं खलु पठामि (अनुनये) विद्यां खल्वध्यापय ॥
खम्	इन्द्रियाकाश-	(इन्द्रिये) ततः खानि च

	ब्रह्मसु ।	संस्पृशेत् (आकाशे) खमाकाशम् ? (ब्रह्मणि) खं ब्रह्म ॥

ग

गुलगुध	पीडार्थे	गुलगुधा करोति जन्तुः ॥

च

च्वि	अभूततद्भावसम्पद्यार्थे ।	अशुक्लः शुक्लः सम्पद्यते तस्य करणं शुक्लीकरणम् ।
चिराय, चिररात्राय, चिरस्य, चिरेण, चिरात्, चिरम्	चिरकालार्थाः ।	चिराय सन्तर्पय धनैः सुपात्राणि । चिररात्राय सञ्चितं वस्तु । चिरस्य इष्टैव मृतोऽतिथिरेव । चिरेणाऽऽगतोऽसि मित्र ! चिरात् स क्व गतोऽस्ति । चिरं विद्या पठनीया ।
चित्	पूजोपमावकुत्सितासाकल्येषु ।	(पूजायाम्) आचार्यश्चिदिदं ब्रूयात् (उपमायाम्) दधिचित् तक्रम् (अवकुत्सिते) कुल्माषांश्चिदाहरति (असाकल्ये , एषु कश्चित् करोति ॥
चटु	लौलुप्ये ।	चटूवर्थं भोजने ॥
चण, चन	अल्पे ।	नास्ति किञ्चण । न जानासि किञ्चन ॥
च	अन्वाचयसमा-	(अन्वाचये) विद्यां पठ गुरुं

	हारेतरेतरसमु-च्चयपादपूरणेषु ।	च सेवस्व (समाहारे) संज्ञा च परिभाषा च संज्ञापरिभाषम् (इतरेतरस्मिन्) धर्मश्च अर्थश्च कामश्च मोक्षश्च ते धर्मार्थकाममोक्षाः (समुच्चये) ईश्वरं च धर्मं च सेवस्व (पादपूरणे) स च प्राह सुशान्ताय ॥

ज

जातु	कस्मिंश्चित् काले ।	न जातु कामः कामानामुपभोगेन शाम्यति ॥
जोषम्	सुखतूष्णीमर्थयो ।	(सुखे) जोषमासीत (तूष्णीमर्थे) जोषं कुरु ॥
ज्यो?(ज्यो)क्	शाश्वते	ज्यो ? (ज्यो) क् पश्येम ॥

झ

झटिति	द्रुतेऽर्थे	नटो वंशं झटित्यारोहति ॥

त

तथाहि	पूर्वसादृश्ये ।	तथाहि वद ॥
तूष्णीम्, तूष्णीकाम्	मौनेऽर्थे ।	कथं तूष्णीं स्थितो भगवन् । तूष्णींकां भव बालिश ॥
तिरस्	तिर्यगर्थे ।	तिरोदृष्ट्या समीक्षते ॥
तथा	साम्येऽर्थे ।	तथैवेदमस्ति ॥

तत्, ततः	हेत्वर्थे ।	यद्वयं याचते तदस्मै ददामि । यतोऽयं विद्वान् ततोऽध्यापयतु ॥
त्वः	विनिग्रहार्थीयसर्वनामार्द्धनामसु ।	(विनिग्रहार्थे) ऋचां त्वः पोषमास्ते (सर्वनाम्नि) त्वो गच्छति, त्वस्मै देहि (अर्द्धनाम्नि) गायत्रं त्वो गायति शक्वरीषु ॥
तदा, तदानीम्	तस्मिन् कालेऽर्थे ।	क्व गतस्त्वं सखे तदा । तदानीमागमिष्यामि ।
तु	भेदावधारणपादपूरणेषु ।	(भेदे) देवदत्ताद्विष्णुमित्रस्तु बलवान् (अवधारणे) वेदोक्तं तु सत्यम् (पादपूरणे) विद्वांस्त्वध्यापयेच्छिष्यान् ॥
तावत्	मानावधिसाकल्यावधारणेषु ।	(माने) तावद्रोक्तव्यं यावत्पचयेत (अवधौ) तावदध्येयं यावज्जीवनम् (साकल्ये) तावद्भुक्तं यावद्दत्तम् (अवधारणे) तावदामन्त्रयस्व यावच्छ्रोत्रियम ॥

द

दक्षिणा,	एते दक्षिण-	दक्षिणा, दक्षिणेन, दक्षिणान

दक्षिणेन, दक्षिणात्, दक्षिणाहि, दक्षिणतः ।	दिग्देश-कालवाचकाः ।	दक्षिणाहि, दक्षिणतः सन्ति वसन्ति वेत्यादि ॥
दिष्ट्या	आनन्देऽर्थे ।	दिष्ट्या ते दर्शनं भ्रातः ॥
दुःषमम्	निन्द्येऽर्थे ।	दुःषमं खलु भाषितम् ॥
दिवा	अहन्यर्थे ।	दिवा तमो निवर्तते ॥
दोषा	रात्रौ रजनी-मुखे च ।	(रात्रौ) दोषा सतारका ख्याता (रजनीमुखे) दोषा सूर्योऽस्तङ्गतः ॥
दुर्	निन्दार्थे ।	दुर्बुद्धिः ॥
द्राक्	द्रुतेऽर्थे ।	द्राग्गच्छति नदी ॥
दुष्ठु	निन्दायाम् ।	दुष्ठु त्याज्यं वचस्त्वया ॥

ध

धिक्	निर्भर्त्सन-निन्दयोः ।	(निर्भर्त्सने) धिक् त्वामनधीतविद्यम् (निन्दायाम्) धिक् पापिनम् ॥
ध्वंसकला	हिंसार्थे ।	ध्वंसकलाकृत्य गतः ॥

न

नहि, नो, ना	अभावेऽर्थे ।	नहि विद्वानधर्मे विचरति । नो अधार्मिकान् सेवेत । ना दुष्टेषु रमेत ॥

ननु	शङ्काविनिग्रहयोः ।	(शङ्कायाम्) नन्वेवं कथमुच्यते (विनिग्रहे) नन्विदं कुरु ॥
निःषमम्	निन्द्येऽर्थे ।	निःषमं वदसि त्वं मूर्खः॥
नूनम्	निश्चये ।	नूनं धर्मः सेवनीयः ॥
निकषा	अन्तिके ।	निकषा गच्छ सन्मित्रान् ॥
नक्तम्	रजन्यर्थे ।	नक्तं चन्द्रो विभाति ॥
नाम	प्रकाशसम्भाव्यक्रोधोपगमकुत्सनेषु ।	(प्रकाशे) हिमालयो नाम नगाधिराजः (सम्भाव्ये) भविष्यति नाम युद्धम् (क्रोधे) मम शत्रुर्नाम पापः (उपगमे) जानाति नाम विद्यया (कुत्सने) को नामायं प्रलपति सभायाम् ॥
निस्, निर्	निश्चयनिषेधयोः ।	(निश्चये) निरुक्तोऽर्थो यास्केन (निषेधे) अधर्मी निष्काशनीयः ॥
नि	विनिग्रहार्थीयः ।	नियमः ॥
नु	क्षिप्रपृच्छाविकल्पेषु ।	(क्षिप्रे) नु गच्छ (पृच्छायाम्) को नु धर्मोऽस्ति (विकल्पे) अयं पण्डितो न्वयं पण्डितः ॥
नीचैस्	अल्पाधोऽर्थयोः ।	(अल्पार्थे) नीचैर्धीरितवारित

		विषयसेवनात् (अधोऽर्थे) नीचैर्गच्छति पापात्मा ॥
नमस्	नत्यर्थे ।	नमस्कुर्यान्मातरम् ॥
नाना	अनेकार्थे ।	नाना पदार्थाः ॥
नेत्	निषेधे ।	नेद् गच्छेदग्रामम् ॥
नञ्, नह्	प्रतिषेधे ।	अब्राह्मणः । नहासत्यं वदेयम् ॥
न किम्, नोचेत्, नचेत्, नकिर्	आकांक्षायाम् ।	इदं नकिं कृतम् । त्वं पठ नोचेद् दुःखी भविष्यसि । त्वं सत्यं वद नचेत् त्वां दण्डयेयम् । नकिरिदमाचरणीयम् ॥
ननु च	प्रश्नदुष्टोक्तयोः ।	(प्रश्ने) ननु चेदं किमस्ति (दुष्टोक्तौ) ननु चास्य वचोऽग्राह्यम् ॥

प

प्र	प्रकर्षगताद्यर्थयोः ।	(प्रकर्षे) प्रभुः (गताद्यर्थे) प्रगत आचार्यः प्राचार्यः ॥
परा	प्रकर्षानुत्कर्षयोः ।	(प्रकर्षे) परागतः (अनुत्कर्षे) पराजयः ॥
पाट्, प्याट्	सम्बोधने ।	पाट् यज्ञदत्त ! प्याट देवदत्त !
पृथक्	वर्जनेऽर्थे ।	दुष्टः पृथक् कार्यः ॥
पुनर्	भेदाप्रथयोः ।	(भेदे) किं पुनर्विद्वांसो

		धार्मिकाः (अप्रथमे) पुनरुक्तमनेन ॥
पुनः	वारम्वारार्थे ।	पुनः पुनः सत्पुरुषाः सेवनीयाः ॥
पुनः		
पुरा	प्रबन्धचिरातीतनिकटागमिषु ।	(प्रबन्धे) पुरा पठयितव्यः (चिरातीते) पुरातनमिदं स्थानम् (निकटे) पुराऽऽयाति मेघः (आगामिनि) पुरा शीतं द्रष्टव्यम् ॥
पुरस्तात्	प्राचीप्रथमदेशकालेषु ।	(प्राच्याम्) पुरस्तादुदेति सूर्यः (प्रथमे) पुरस्ताद् गच्छ (देशे काले च) पुरस्ताद् देशे काले वा प्राप्तम् ॥
प्रति	प्रतिनिधिप्रतिदानलक्षणेत्थम्भूताख्यानभागवीप्सासु ।	(प्रतिनिधौ) मन्त्री राज्ञः प्रति (प्रतिदाने) प्रतितिलेभ्यो माषान् देहि (लक्षणे) वृक्षं प्रति विद्योतते विद्युत (इत्थम्भूताख्याने) प्रगल्भं प्रतिसम्भाषणीयम् (भागे) इदं मां प्रति स्यात् (वीप्सायाम्) वृक्षं वृक्षं प्रति सिञ्च
पश्चात्	प्रतीचीचर-	(प्रतीच्याम्) पश्चादस्तं गतो

	भयोः ।	रविः (चरमे)पश्चाद् वयसि संन्यसेत ॥
प्रसीम्	प्रसर्गसीमासर्वतोभावेषु ।	(प्रसर्गे) प्रसीमादित्योऽसृजत् ? (सीमायाम्) प्रसीं समुद्रं गच्छेत् (सर्वतोभावे) प्रसीं वायुर्वाति ॥
पुरः, पुरतः	सम्मुखार्थे	पुरो गच्छ, पुरतः पठ ।
प्रेत्य	भवान्तरे	प्रेत्यात्र जायते जन्तुः ॥
प्रसह्य	हठार्थे	कथं प्रसह्य करोषि ॥
प्रादुस्	नामप्रकाशप्राकट्येषु ।	(नाम्नि) प्रादुरासीद्युधिष्ठिरः (प्रकाशे) प्रादुरासीत्तमोनुदः (प्राकट्ये) प्रादुष्कृता त्वया विद्या ॥
परितस्	सर्वतोभावे	आयान्तु परितः श्रियः ॥
परमम्, परम	अङ्गीकारेऽर्थे	परममुक्तं त्वयाऽनघ, परमाप्तोक्तम् ॥
प्राक्	अतीतपूर्वदिग्देशकालवाचकः ।	(अतीते) प्रागासीज्जगदुत्पत्तिः (पूर्वदिशि) प्राग्गच्छन्तु गता वा (देशे काले च) प्राग्देशे काले वा ॥
पुनर्	निश्चयपश्चादर्थयोः ।	(निश्चये) किं पुनर्ब्राह्मणाः पुण्याः (पश्चादर्थे) पुनर्जन्म ॥

प्रायस्	बहुधार्थे ।	अस्मिन्नगरे प्रायो धनाढ्याः सन्ति ॥
प्रगे, प्रातर्	प्रभातेऽर्थे ।	प्रगे सर्वैर्न शयितव्यम् । प्रातः स्नाहि यदीष्टं स्यात् ॥
परुत्	वर्तमानात्पूर्वे वर्षे ।	परुज्जातो बालः ॥
परारि	पूर्वतरे वर्षे ।	परारि जाता कार्येयम् ॥
पूर्वेद्युः	पूर्वस्मिन् दिने ।	पूर्वेद्युरगमं ग्रामम् ॥
परे द्यवि	परेऽह्नि ।	परे द्यव्यागतो विद्वान् ॥
परश्वस्	तत्परागामिदिने ।	परश्व आगमिष्यामि ॥
प्रत्यक्	पश्चिमदिग्देश-कालवाचकः ।	प्रत्यग्गच्छन्त्यागच्छन्ति ॥
प्रबाहुकम्	प्राबल्ये	प्रबाहुकं कुर्वन्ति दस्यवः ॥
प्राध्वम्	बन्धनानुकूलार्थयोः ।	(बन्धने) प्राध्वं चौरो मया (आनुकूल्ये) प्राध्वं मित्रं मया ॥

फ

फट्	शैघ्र्ये ।	फड् वद ॥
फलू, फली	विकारेऽर्थे ।	फलूकृत्य, फलीकृत्य ॥

ब

बाट्	आनुकूल्ये ।	बाड् गच्छेत् ॥
बहुलम्	बहुधार्थे ।	उणादयो बहुलम् ॥

बहिर्	बाह्येऽर्थे ।	बहिष्कार्यो दुष्टात्मा ॥
बलवत्	अतिशयार्थे ।	बलवन्निगृह्णाति ॥
बत	खेदानुकम्पा-सन्तोषविस्मयाऽऽमन्त्रणेषु ।	(खेदे) बत महत्कष्टम् (अनुकम्पायाम्)बतायमरोगः स्यात् (सन्तोषे),मात्रा पुत्रो बतालिङ्गितः (विस्मये) किमिदं बत दृश्यते (आमन्त्रणे) एहि बत सुखं भुङ्क्ष्व ॥

भ

भोः	सम्बोधने ।	भोः शिष्य ! सद्यः पठ ॥
भाजक्	त्रिभागे ।	भाजगन्नं देयं भिक्षुकेभ्यः ॥
भूरि	बह्वर्थे ।	भूरि विद्यार्थिनः पठन्ति ॥
भूयस्	पुनः पुनरधिकार्थयोः ।	(पुनःपुनरर्थे) भूयस्तेऽहं प्रवक्ष्यामि (अधिकार्थे) भूयो देहि सत्पात्राय ॥
भ्रंसकला	हिंसार्थे ।	भ्रंसकला कृत्य ॥

म

मुहुः	बारम्बारेऽर्थे ।	मुहुर्द्रष्टव्यो वेदः ॥
मङ्क्षु	द्रुतेऽर्थे ।	मङ्क्षु धावन्ति मृगाः ॥
मृषा, मुधा, मिथ्या	व्यर्थकेऽर्थे ।	मृषा वदति धूर्तोऽयम । मुधा मूर्खा भ्रमन्त्यत्र । मिथ्येदं

		वचनं वेदविरुद्धम् ॥
मनाक्	अल्पेऽर्थे ।	मनाङ् भुक्तं कथं त्वया ।
मा स्म, मा, मो	वारणे	मास्म कुर्या इदं पुत्र । मा कुर्व-धर्मे मनः । मो अहं द्विषे धर्मम् ॥
माकिम	निषेधे ।	माकिमसत्यं वदेत् ॥
मात्रायाम्	अल्पे ।	रुग्णेन मात्रायां भोक्तव्यम् ॥

य

यथायथम्, यथास्वम	यथावदर्थे ।	यथायथं वदत्याप्तः । यथास्वं धर्मं पालयति ॥
यत्, यतः	हेत्वर्थे ।	यदयं याचते तदिदं ददामि । यतोऽयं विद्वांस्ततो धार्मिकः ॥
यावत्	मानावधि-साकल्याव-धारणेषु ।	(माने) यावद् बुद्धिस्ताव-दध्येयम् (अवधौ) यावद् ब्रह्मचर्यं तावदध्येयम् (साक-ल्ये) यावद् वेदार्थं तावदधी-तम् (अवधारणे) यावद् भोक्तव्यम ॥
यथा, यथो	सादृश्यापर-भावयोः ।	(सादृश्ये) यथा, यथो वा देवदत्तस्तथा विष्णुमित्रः पठति (अपरभावे) यथा

		यथो वा धावति ॥
यथार्थम्	सत्येऽर्थे ।	यथार्थं वदति धर्मात्मा ॥
युगपत्	सहार्थे ।	आगता युगपत् सर्वे ॥

र

रै, रे	नीचसम्बोधने ।	रै वा रे जन ॥

व

विश्वक्, विश्वतस्	सर्वतोभावे ।	विश्वगवस्थितं ब्रह्म । विश्वतो धर्ममाचरेत् ॥
वौषट्, वषट्	वाक्यार्थे ।	बालो मातुर्वौषड् वसेत् । इन्द्रो वषड् वर्षति ॥
वत्, व	साम्येऽर्थे ।	तद्वदिम् । इदं व तत् ॥
वि	पृथग्विशेषार्थयोः ।	(पृथगर्थे) विगतः (विशेषार्थे) विशिष्टः ॥
वा	उपमानिश्चयार्थविकल्पेषु ।	(उपमायाम्) सिंहो वा क्रुद्धो भवति (निश्चये) सत्यं वाप्तैः सुसेवितम (विकल्पे) व्याकरणं पठसि वा वेदम् ।
वृथा	व्यर्थकेऽर्थे ।	वृथा पुष्टो देवदत्तः ॥
वै	पादपूरणनिश्चयार्थयोः ।	(पादपूरणे) अहं त्वाम् वच्मि वै हितम (निश्चये) सत्यं वै सततं ब्रूयात् ॥

वरम्	अङ्गीकारे।	वरं विप्रः सुयन्त्रितः ॥
वेलायाम्	समये।	वेलायां भोक्तव्यम् ॥
वशम्	स्वाधीनतायाम्।	शत्रून् वशं नयेत् ॥
विक्ली,	हिंसायाम्।	विक्लीकृत्य।
वर्षाली		वर्षालीकृत्य ॥

श

शश्वत्	पुनः सदार्थयोः।	(पुनरर्थे) शश्वत् सन्ध्यामुपासीत (सदार्थे) शश्वत् सत्यं वद।
शु	शीघ्रे।	शु पठ ॥
शम्	सुखकल्याणयोः।	(सुखे) शमस्तु ते (कल्याणे) शङ्करः ॥
श्रौषट्	वाक्यार्थयोगे।	जिज्ञासुर्विदुषः श्रौषड् गच्छेत् ॥
शमुपजोषम्	आनन्दे।	समुपजोषं सेवन्ताम् ॥
श्वस्	अनागतेऽह्नि	श्वो गन्तास्मि तवान्तिकम् ॥
शकला	हिंसायाम्।	शकलाकृत्य ॥
शकृ	मले।	शकृत् कृतं वत्सेन ॥

स

सम	एकीभावानन्दयोः।	(एकीभावे) सङ्गतं घृतं तैले (आनन्दे) समागतः सत्पुरुषान् ॥

स्वस्ति	आशीःक्षेम-पुण्येषु ।	(आशिषि) स्वस्ति ते भूयात् (क्षेमे) स्वस्ति गच्छ (पुण्ये) स्वस्तिमान सुखमाप्नोति ॥
सकृत्	सहैकवारयोः ।	(सह) सकृद् गच्छन्तु भृत्याः (एकवारे) सकृद् विवाहं कुर्यात् ॥
साक्षात्	तुल्यप्रत्यक्षयोः ।	(तुल्ये) साक्षात सिंहोऽयं वीरः (प्रत्यक्षे) साक्षान्मुनिर्मया दृष्टः ॥
सीम्	सीमायाम् ।	विसीमतः सुरुचो वेन आवः ॥
सामि	अर्द्धजुगुप्सयोः ।	(अर्द्धे) सामि पठितं व्याकरणम् (जुगुप्सायाम्) साम्यधर्मः सेवितोऽनेन ॥
समया	अन्तिकमध्ययोः ।	(अन्तिके) समया नगरं नदी (मध्ये) समया शैलं ग्रामः ॥
स्राक्, सपदि, सद्यः	द्रुतेऽर्थे ।	स्राक् पठति बुद्धिमान् । सपदि धावत्यश्वः । सद्यो याहि ॥
सु	पूजने ।	सुपुरुषः ॥
साचि	तिर्यगर्थे ।	साचि गमनं करोति सर्पः ॥
साकम्, सार्द्धम्,	सङ्गेऽर्थे ।	राज्ञा साकं गच्छन्तु । शिष्यैः सार्द्धमागतोऽध्यापकः पित्रा

समम्,		समं न विवदितव्यम्। मया
सत्रा, सह		सत्रा को गच्छेत्। विदुषा सह मन्त्री सदा रक्षेत्॥
स्वाहा, स्वधा	वाक्यार्थ-योगे।	अग्नये स्वाहा। पितृभ्यः स्वधा॥
साम्प्रतम्, सम्प्रति	युक्तवर्तमानार्थयोः।	(युक्ते) क्रमशो वच्मि साम्प्रतं सम्प्रति वा (वर्तमाने) साम्प्रतं गच्छामि सम्प्रति वा॥
स्थाने	युक्तेऽर्थे।	अयं तिष्ठतु राज्ञः स्थाने॥
समन्ततस्, सर्वतस्		मेघो वर्षति समन्ततः। सर्वतो वाति पवनः॥
संवत	वर्षे	प्रभवो नाम संवत्॥
स्वयम्	आत्मार्थे।	स्वयमिच्छामि पठितुम॥
सना, सनुतर् सनत्, सनात्	सर्वदाऽर्थे।	सनातनः। सनुतः पुरुषार्थे प्रयतेरन्। सनद्विद्यां सेवन्ताम्। सनाद् बुद्धिं वर्धयति विद्वान्॥
स्म	अतीते।	भवति स्म विद्याढ्यो देवदत्तः॥
सुष्ठु	प्रशंसायाम्।	सुष्ठु काव्यं पठसि त्वम्॥
सायम्	सन्ध्यासमये।	सायं सन्ध्यामुपासीरन्॥
सदा, सर्वदा	सर्वस्मिन् काले।	धर्मः सदा नरैः सेव्यः॥

सजूः, सूपत्	सहार्थे ।	सजूः, सूपद् वा गच्छन्ति भृत्याः ॥
स्रंसकला	हिंसायाम् ।	स्रंसकलाकृत्य ॥
सत्	आदरे ।	सत्कृत्य । सत्कृतम् । यत्सत्करोति ॥
सहसा	अतर्कितबलात्कारयोः ।	(अतर्किते) सहसा करोत्ययं सदा (बलात्कारे) सहसा विदधीत न क्रियाम् ॥
सम्यक्	दृढप्रशंसयोः ।	(दृढे) सम्यग्धार्मिकः (प्रशंसायाम्) सम्यगध्यापकः ॥

ह

हन्त	हर्षविषादानुकम्पावाक्यारम्भे ।	(हर्षे) हन्त लाभो महान् प्राप्तः (विषादे) हन्त नष्टो बन्धुर्मे (अनुकम्पायाम्) हन्त दीनो रक्षितव्यः (वाक्यारम्भे) हन्त ते कथयिष्यामि ॥
ह	अवधारणविनिग्रहार्थपादपूरणेषु ।	(अवधारणे) अयमिदं ह करिष्यति (विनिग्रहे) अयं हेदं करोतु (पादपूरणे) तं हाध्यापयति प्राज्ञः ॥
हि	हेत्वपदेशानु-	(हेत्वपदेशे) इदं हि करिष्यति

	पृष्टासूयावधा-रणपादपूरण-विस्मयेषु ।	(अनुपृष्टे) कथं हि करिष्यति (असूयायाम्) कथं हि व्याकरिष्यति (अवधारणे) इदं हि कर्त्तव्यम् (पादपूरणे) अहं हि यास्यामि वरं पुरं तव (विस्मये) बलं हि वीरस्य समीक्ष्यतां नराः! (युष्माभिः)॥
हूम्	वितर्कपरि-प्रश्नयोः ।	(वितर्के) दुःखमिदानीन्तनेन कर्मणा हूं पुरातनेन(परिप्रश्ने) हूं देवदत्त त्वया किं किमधीतम् ॥
हिरुक्	वर्जनेऽर्थे ।	हिरुग्धर्मेण कुतः सुखम् ॥
हे, है	सम्बोधने ।	हे विद्वन्नुपदिश । है अध्यापक पाठय ॥
ह्यस्	गतदिने ।	ह्यः सखाऽयं समागच्छत् ।
हाहा	खेदहास्ययोः ।	(खेदे) हाहा पुत्रो मृतो मे (हास्ये) हाहा तव का वार्ता ॥
हो	विस्मये ।	हो वीरेण बहुकृतम् ॥

अथ कृदन्तानामव्ययानामर्थाः

से	तुमर्थे छन्दसि	वक्षे रायः (धनानि वोढुम्) ॥
सेन्	,, ,,	ता वामेषे रथानाम् (युवां

		स्थान् गमयितुं समर्थौ)
असे, असेन्	,, ,,	क्रत्वे दक्षाय जीवसे (जीवितुम्)
कसे, कसेन्	,, ,,	प्रेषे भगाय । श्रियसे ॥
अध्यै, अध्यैन्	,, ,,	कर्माण्युपाचरध्यै ॥
कध्यै, कध्यैन्	,, ,,	इन्द्राग्नी आहुवध्यै ॥
शध्यै, शध्यैन्	,, ,,	सह मादयध्यै ॥
तवै	,, ,,	ब्राह्मणेनन म्लेच्छितवै नापभाषितवै ॥
तवेङ्	,, ,,	दशमे मासि सूतवे ॥
तवेन्	,, ,,	स्वदेशेषु गन्तवे ॥
कै	,, ,,	प्रयै देवेभ्यः (प्रमातुमित्यर्थः)
इष्यै	,, ,,	अपामोषधीनां रोहिष्यै (रोहणाय)। अव्यथिष्यै (अव्यथनाय) ॥
के	,, ,,	दृशे विश्वाय सूर्यम् (द्रष्टुम्) विख्ये (विख्यातुम्) ॥
तवै	कृत्यार्थे छन्दसि	परिधातवै (परिधातव्यम्)
केन्	,, ,,	नावगाहे (नावगाहितव्यम्) ॥
केन्य	,, ,,	शुश्रूषेण्यः (शुश्रूषितव्यः) ॥
त्वन्	,, ,,	कर्त्वं हविः (कर्तव्यम्) ॥
एश्	,, ,,	नावचक्षे (नावख्यातव्यम्) ॥

क्त्वा	प्रतिषेधार्था-लंखलुयोगे-समानकर्तृक-योः पूर्वकाले व्यतिहारे वा ।	(प्रतिषेधे) अलं खलु वा कृत्वा (समानकर्तृकयोः पूर्वकाले) पठित्वा पाठयेत् (व्यतिहारे) अवमित्य याचते ॥
तोसुन्	ईश्वरशब्दे-उपपदे तुमर्थे-भावलक्षणे-स्थादिभ्यो वा छन्दसि ।	ईश्वरोऽभिचरितोः (अभि-चरितुमित्यर्थः) आसंस्थातो-र्वेद्यां सीदन्ति ॥
कसुन्	ईश्वरशब्दे उप-पदे भावलक्षणे-वर्तमानयोः सृपि-तृदोस्तुमर्थे वा छन्दसि ।	ईश्वरो विलिखः (विलिखितुं समर्थ इत्यर्थः) पुरा क्रूरस्य विसृपः (विसृप्तुमित्यर्थः) पुरा जर्तृभ्य आतृदः (आत-र्दितुमित्यर्थः) ।
णमुल्	शक्युपपदे वेदे समानकर्तृक-कयोः पूर्वकाले वा सर्वत्र ।	अग्निं वै देवा विभाजं नाश-क्नुवन् (विभक्तुमित्यर्थः) । स्मारं स्मारं वेदवचोऽधीते (स्मृत्वा स्मृत्वेत्यर्थः) ॥
कमुल्	शक्युपपदे-छन्दसि ।	अग्निमपलुपं नाशक्नुवन् (अपलोप्तुमित्यर्थः) ॥
तुमुन	क्रियार्थायां क्रिया-यामुपपदे ।	भोक्तुं व्रजति (भोजना-येत्यर्थः) ॥

अथ तद्धितान्तानामव्ययानामर्थाः

तसिल्	पञ्चम्यन्तात् ।	कस्मात् काभ्यां केभ्य इति कुतः । सर्वस्मात् सर्वाभ्यां सर्वेभ्य इति सर्वत इत्यादि ।
त्रल्	सप्तम्यन्तात् ।	सर्वस्मिन्निति सर्वत्र ॥
ह	इदमः सप्तम्यन्तात् किमो वा वेदे ।	अस्मिन् अनयोरेष्विति-इह । कुहास्मिपित्वं करतोः ॥
व	किमो व सप्तम्यन्तात् ।	क्व ब्राह्मणस्य चावकाः ॥
दा	सर्वादिभ्यः काले ।	सर्वस्मिन् काले सर्वदा । कस्मिन् काले कदा । यस्मिन् काले यदा । तस्मिन् काले तदा ॥
र्हिल्	काले ।	एतस्मिन् काले--एतर्हि । कस्मिन् काले कर्हि । तस्मिन् काले तर्हि । यस्मिन् काले यर्हि ॥
धुना	इदं शब्दात् ।	अस्मिन् काले अधुना ।
दानीम्	इदन्तच्छब्दाभ्यां काले ।	अस्मिन् काले इदानीम् । तस्मिन् काले तदानीम् ॥

थाल्	प्रकारवचने ।	सर्वेण, सर्वाभ्यां, सर्वैश्च प्रकारैः सर्वथा, एवमेव यथा तथा, इत्यादि ।
थमु	इदमः किमश्च प्रकारवचने ।	अनेन, आभ्याम्, एभिश्च प्रकारैः इत्थम् । केन, काभ्याम्, कैश्च प्रकारैः कथम् ॥
था	प्रकारवचने किमो-हेतौ छन्दसि च ।	(प्रकारवचने) सर्वेण प्रकारेण सर्वथा (किमो हेतौ छन्दसि (कथा ग्रामं न पृच्छसि (केन हेतुना न पृच्छसित्यर्थः) ॥
अस्ताति	सप्तमीपञ्चमी-प्रथमान्ताद् दिग्देशवाचिनो दिग्देशकालेषु ।	प्राच्यां दिशि पूर्वस्मिन् देशे काले वा पूर्वस्या दिशः पूर्वस्माद्देशात् कालाद्वा पूर्वा दिक् पूर्वो देशः काल इति पुरस्तात् ॥
अतसुच्	दक्षिणादि-भ्योऽस्तात्यर्थे ।	दक्षिणतो वसति । दक्षिणत आगतः । दक्षिणतो रमणीयम् । परतो वसति । परत आगतः । परतो रमणीयम् । एवमेव-उत्तरत इत्यादि । परस्ताद् वसत्यवस्तोऽवस्ता-

		द्वसतीत्यादि च। प्राग्वसति प्रागागतः प्राग्रमणीय-मित्यादि च॥
आति	उत्तराधरदक्षिणादस्तात्यर्थे।	उत्तरादधराद् दक्षिणाच्च वसति, आगतो रमणीयं चेत्यादि॥
एनप्	सप्तमीप्रथमान्तादुत्तरादिभ्योऽस्तात्यर्थेऽदूरे।	उत्तरेण, अवरेण, दक्षिणेन वसतीत्यादि॥
आच्	सप्तमीप्रथमान्ताद्दक्षिणशब्दादस्तात्यर्थे।	दक्षिणा वसति, इत्यादि॥
धा	विविधार्थे द्रव्यविचाले वा संख्यातः।	एकविधा, इत्येकधा, एवं द्विधा चतुर्धा, इत्यादि॥
ध्यमुञ्	उक्तधाप्रत्ययादेशोऽन्यतरस्यामेकशब्दतः।	एकध्यम्।
धमुञ्	द्वित्रिभ्यां धाप्रत्ययादेशः।	द्वैधम्, त्रैधम्॥
एधाच्	द्वित्रिभ्यां धाप्रत्ययादेशो वा।	द्वेधा। त्रिधा॥

कृत्वसुच्	क्रियाभ्यावृत्ति-गणने ।	पञ्चकृत्वोऽधीतोऽनुवाकः (पञ्चवारं कृत्वेत्यर्थः) एवमेव षट्कृत्व इत्यादि ॥
सुच्	,, ,,	दिनस्य द्विरधीते, त्रिरधीते, चतुरधीते (एकस्मिन् दिने द्विवारं त्रिवारं चतुर्वारं वा पठतीत्यर्थः ॥
शस्	बह्वल्पार्थात् कारकात् ।	अल्पशो ग्रन्थानधीतवान् (अल्पानित्यर्थः)। बहुशो वित्तं गृह्णाति (बहुवित्तमित्यर्थः)॥
आमु	घप्रत्ययान्त[illegible] किम[illegible]दिभ्यो द्रव्यप्रकर्षे ।	किन्तराम् । किन्तमाम् । पचतितराम् । जल्पतितमाम् । उच्चैस्तमाम् ॥
अम्	[illegible]छन्दसि ।	प्रतरं नमामः ॥
तसि	प्रतियोगे पञ्चम्यन्ताद् आद्यादिभ्यश्च ।	प्रद्युम्नः कृष्णतः प्रति । आदितः । अन्ततः ॥
वति	तृतीयाषष्ठीसप्तम्यान्तात्तुल्ये ।	स्थानिवत् । ब्राह्मणवत् । आद्यन्तवत, इत्यादि ॥
ना, नाञ्	पृथग्भाववाचि-[illegible]नञ्भ्यां	विना, नाना ॥

च्वि	कृभ्वस्तियोगे सम्पद्यकर्तरि।	भस्मी भवति। पात्रीकरोति।
साति	कृभ्वस्तियोगे कार्त्स्न्ये ऽभि-विधौ तदधीन-वचने च।	भस्मसात् कुरुते। ब्राह्मण-सात् करोति॥
त्रा	तदधीनवचने देवेऽर्थे।	देवत्रा वसति। मनुष्यत्रा गच्छति। पुरुषत्रा वसति॥
डाच्	अव्यक्तादनुक-करणाद् द्व्यज-वरार्धात्।	पटपटा भवति। पटपटा करोति। दमदमा भवति। दमदमा स्यात्, इत्यादि।

एतेषां क्त्वादिप्रत्ययानामन्यविशेषोऽष्टाध्याय्यां द्रष्टव्यः।

इति

निरुक्तसम्मर्शः

स्वामिब्रह्ममुनेः "निरुक्तसम्मर्शः" इति निरुक्तभाष्यं छात्रेभ्योऽध्यापकेभ्यश्च समानं लाभप्रदमस्ति, अत्रातिकठिनं स्थलमपि सौगम्येन व्याख्यातम्। एतद् भाष्यं मौलिकमस्ति तच्चैनमवलोक्य विचारशीला विद्वांस आश्चर्यमिश्रितं हर्षमनुभविष्यन्ति, निरुक्तसम्बन्धिनीनामनेकभ्रान्तीनां च निवृत्तिरनेन भविष्यति। इदं निरुक्तभाष्यमूहापोहगवेषणाभिः समुपेतं तथात्रान्यभाष्यकारैरुपेक्षितानां कठिनस्थलानां स्पष्टीकरणार्थं विशेषतः प्रयतितम्। एकसहस्रपृष्ठदेशीययुक्तं बृहदाकारकं सवस्त्रपक्वावरणं मूल्यं चास्य रूप्यपञ्चदशकं व्ययमात्रं प्राप्तिस्थानम्—

आर्य साहित्य मण्डल, अजमेर

सांख्यदर्शनं ब्रह्ममुनिभाष्योपेतम्

प्राप्तिस्थानम्—

मोतीलाल बनारसीदास, पुस्तकविक्रेता

जवाहर नगर, बंगलो रोड, दिल्ली-७